# ॥ श्रीराधातापिनीस्तुतिः ॥

.. Shri RadhAtApinIstutiH ..

sanskritdocuments.org

November 5, 2017

# .. Shri RadhAtApinIstutiH ..

# ॥ श्रीराधातापिनीस्तुतिः ॥

## Sanskrit Document Information

Text title : rAdhAtApinIstutiH

File name : rAdhAtApinIstutiH.itx

Category : devii, radha

Location : doc_devii

Description-comments : sarasa stotrasangrahaH (Lucknow, 1909)

Latest update : November 4, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 5, 2017

*sanskritdocuments.org*

सहोवाच ।
का सा राधा कीदृशं रूपं का मूर्तिः किं ध्यानं
किं कीलकं किं बीजं को मन्त्रः ॥

का निवाहनानि कत्यङ्गानि किं पुरश्चरणं कः समाधिः ॥

किमनेन साध्यते ॥

किं फलं किं बलं गुणो यथा मन्त्रस्तत्सर्वं ब्रूहीति ॥

सहोवाच ।
श्रीराधेति परमप्रकृतिः सैव लक्ष्मीः सरस्वती सैव
लोककर्त्री लोकमाता देवजननी ॥

गोलोकवासिनी गोलोकनियन्त्री वैकुण्ठाधिष्ठात्री रूपं
दाहोवतीर्णा सुवर्णवर्णप्रध्वंसनमूर्तिः ॥

सर्वाङ्गसुन्दरी ध्यानं द्विभुजा कमलनयना त्रैलोक्यमोहिनी ध्यायेदिति ॥

अथर्वणोक्तध्यानं किं कीलकमिति ॥

सहोवाच ॥

ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥

इति महाकीलकमिति किं बीजमिति ॥

सहोवाच ॥

ॐ श्रीराधिकायै हुं फट् ॥

इति कीलकमेष वै परमो मन्त्रः ॥

इति बीजमुच्यते ॥

को मन्त्र इति सहोवाच ॥

ॐ श्रीं ह्रीं क्लीं हुं फट् स्वाहेति मन्त्रः ॥

एतस्य श्रीभगवान् कृष्णः परमात्मा देवतेति षडक्षरोयं मन्त्र इति ॥

ओमिति बीजं फडिति शक्तिः श्रीमिति कीलकं ह्रीमित्यस्त्रं
क्लीमिति कीलकमिति चतुर्वर्गसिद्धौ विनियोगः ॥

अथ ध्यानं
श्रृणु सुवर्णकेतकीवर्णाभ्यां द्विभुजां कमलनयनां
बिम्बोष्ठीं राधिकां कृष्णमनोहरवतीं त्रैलोक्यमोहिनीम् ॥

श्रीमद् वृन्दावननिकेतनां ध्यायेदिति यो जपति शतमष्टोत्तरम् ॥

सर्वलोकाञ्जयति सर्वजनान् वशीकरोति सर्वदेवाधिको भवति ॥

वाञ्छति चेत् पुत्रपौत्रादिकमाप्नोति सस्वर्गलोकमश्नुते ब्रह्मलोके महीयते
दिक् पालत्वमाप्नोति गन्धर्वविद्यानिपुणो भवति सङ्गीतविद्याचतुरो भवति
सर्ववेदपारायणं लभते सर्वतीर्थफलमश्नुते ॥

सर्वाँल्लोकाञ्जयति सर्वान् देवाञ्जयति लोकाधिपो भवति ॥

सुतलादिलोकमनोहरो भवति ॥ अतीव प्रियतरो भगवद्विष्णोर्भवति ॥

इयं श्रीराधातापिनी पठिता श्रुता गृहे लिखित्वा स्थापिता श्रीमतः ॥

श्रीकृष्णस्य प्रेमभक्तिं कारयति श्रीकृष्णवल्लभो भवति ॥

श्रद्धावान् पठनशील इति ॥

सहोवाच ॥

सर्वलोकासाधारण्यं प्राप्नोति ॥

सर्ववेदपाठजनितपुण्यापुण्यतरो भवति ॥

एवं यो वेदसपरमज्ञानी भवति ॥

परमभागवतो भवति परमसन्तुष्टो भवति ॥

परमाह्लादवान् भवति ॥ एतद् गुप्तं गोलोके ततो मनुष्यलोकमवतीर्णम् ॥

इति ह वेदवेदविद्भवति इत्याथर्वणीयम् ॥

इति श्रीराधातापिनीसमाप्तिमगात् ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com
From shrI sarasa stotrasangrahaH (Lucknow, 1909).

.. Shri RadhAtApinIstutiH ..

on November 5, 2017

Please send corrections to *sanskrit@cheerful.com*